प्रकाशकः-
कार्यवाहकः-शा० ईश्वरदास मूळचंद
श्रीविजयलावण्यसूरीश्वर-ज्ञानमन्दिर,
बोटाद, सौराष्ट्र

Library IIAS, Shi
S 491.25 Su 77.I-II DL. Su 7
00007212

मुद्रकः—
श्रीमती लक्ष्मीबाई नारायण चौधरी,
निर्णयसागर प्रेस, २६-२८ कोलभाट स्ट्रीट,
मुंबई. २

श्रीविजयनेमिसूरीश्वरग्रन्थमालारत्नम्-४३

॥ आशैशवशीलशालिने श्रीनेमीश्वराय नमः ॥

॥ कलिकालसर्वज्ञाय श्रीहेमचन्द्रसूरीश्वराय नमः ॥



# धातुरत्नाकरः ।

तस्य चायं

## [आत्मनेपदपरस्मैपदप्रक्रियानिरूपणात्मकः] अष्टमो विभागः



प्रणेता-

शासनसम्राट्-सूरिचक्रचक्रवर्ति-तपोगच्छाधिपति-
श्रीमद्विजयनेमिसूरीश्वरपट्टालङ्कार-व्याकरणवाचस्पति-कविरत्न-
शास्त्रविशारद-श्रीमद्विजयलावण्यसूरीश्वरः

सम्पादकः-

पंन्यासश्रीसुशीलविजयो गणिवरः

S
491.25
Su 77.I-8 DL

ळचंद
र-ज्ञानमन्दिर,
., साराष्ट्र

द्रव्यसहायकः-
पंडित-हरगोवनदास
रामचंद शाह.
ठे० जवेररोड, मु० मुलुन्द
जील्ला-थाणा [मुंबई]

वीरसं० २४८१] नेमिसं० ६ [विक्रमसं० २०११]

(प्रथमावृत्तिः) (मूल्यम्- १-८-०)

मुद्रणस्थलम्- निर्णयसागर प्रेस, २६/२८ कोलभाट स्ट्रीट, मुंबई. २

INDIAN INSTITUTE OF
ADVANCED STUDY
SIMLA

श्रीविजयनेमिसूरीश्वरग्रन्थमालारत्नम्-४२

॥ आशैशवशीलशालिने श्रीनेमीश्वराय नमः ॥

॥ कलिकालसर्वज्ञाय श्रीहेमचन्द्रसूरीश्वराय नमः ॥



# धातुरत्नाकरः ।

तस्य चायं

## [आत्मनेपदपरस्मैपदप्रक्रियानिरूपणात्मकः]
## अष्टमो विभागः



प्रणेता-

शासनसम्राट्-सूरिचक्रचक्रवर्ति-तपोगच्छाधिपति-
श्रीमद्विजयनेमिसूरीश्वरपट्टालङ्कार-व्याकरणवाचस्पति-कविरत्न-
शास्त्रविशारद-श्रीमद्विजयलावण्यसूरीश्वरः

सम्पादकः-

**पंन्यासश्रीसुशीलविजयो गणिवरः**

प्रकाशकः-

श्रीविजयलावण्यसूरीश्वर-
ज्ञानमन्दिर, बोटाद, सौराष्ट्र

द्रव्यसहायकः-

पंडित-हरगोवनदास
रामचंद शाह.
ठे० जवेररोड, मु० मुलुन्द
जील्ला-थाणा [मुंबई]

वीरसं० २४८१] नेमिसं० ६ [विक्रमसं. २०११

(प्रथमावृत्तिः) (मूल्यम्- १-६-०)

मुद्रणस्थलम्- निर्णयसागर प्रेस, २६/२८ कोलभाट स्ट्रीट, मुंबई. २

CATALOGUED

MOTILAL BANARSIDASS
DELHI

INSTITUTE OF ADVANCED STUDY
No. 7212
Date 25.11.65

491.25
Su 77 VIII
DL

**–प्राप्तिस्थान–**

[१]

**सरस्वती पुस्तक भण्डार**

ठे० रतनपोळ, ( हाथीखाना )

मु०–अमदावाद ( गुजरात )

[२]

**गुर्जरग्रन्थरत्न कार्यालय**

ठे० गांधीरोड,

मु०–अमदावाद ( गुजरात )

IIAS, Shimla
Library
S 491.25 Su 77.1-11 DL. Su 77
00007212

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 7212
Date 25.11.65
SIMLA.

23.1.82

॥ अर्हम् ॥

॥ आशशवशीलशालिने श्रीनेमीश्वराय नमः ॥

श्रीमत्तपोगच्छाधिपति - शासनसम्राट् - सर्वतन्त्रस्वतन्त्र - तीर्थोद्धारक-
जगद्गुरु - श्रीविजयनेमिसूरीश्वरपट्टालङ्कारेण व्याकरण-
वाचस्पति - शास्त्रविशारद - कविरत्नेतिपदालङ्कृतेन
श्रीविजयलावण्यसूरिणा प्रणीतो—

# धातुरत्नाकरः ।

## [ तस्य चायमष्टमो विभागः ]

नत्वा श्रीनेमिनामान - माजन्मब्रह्मचारिणम् ।
तीर्थनाथं गुरुं चैव भारतीं जिनभाषिताम् ॥ १ ॥
धातुरत्नाकरे भाग - मष्टमं तनुतेतराम् ।
सूरिर्लावण्यनामा स, बालानां सुखहेतवे ॥ २ ॥

निरूपिता भावकर्मप्रक्रिया, अथात्मनेपदप्रक्रिया परस्मैपदप्रक्रिया च निरूप्यते, तत्र प्रथमं तावद्—

## आत्मनेपदप्रक्रिया ।

तत्र "तत् साप्या-ऽनाप्यात् कर्म-भावे कृत्य-क्त-खलर्थाश्च" [ ३. ३. २१. ] इति सकर्मकाद् धातोः कर्मणि अकर्मकाच्च भावे आत्मनेपदं भवति; यथा ८८८ "डुकृंग् करणे" क्रियते कटश्चैत्रेण, १ "भू सत्तायाम्" भूयते त्वया, एतद्रूपाणि सप्तमभागे भाव-कर्मप्रक्रियायां दर्शितानि ।

"इङितः कर्तरि" [ ३. ३. २२. ] इति इकारानुबन्धाद् ङकारानुबन्धाच्च धातोः कर्तर्यात्मनेपदं भवति, ७४१ "एधि वृद्धौ" एधते, ११०४ "शीङ् स्वप्ने" शेते, एतद्रूपाणि प्रथमभागे दर्शितानि।

"क्रियाव्यतिहारेऽगति-हिंसा-शब्दार्थ-हसो हृ-वहश्चानन्योऽन्यार्थे" [ ३. ३. २३. ] इति क्रियाव्यतिहारे वर्तमानाद् गति-हिंसा-शब्दार्थ-हसवर्जाद् धातोर्हृ-वहिभ्यां च कर्तर्यात्मनेपदं भवति, यथा १५१९ "लूग्श् छेदने" व्यतिलुनते, ८८५ "हृंग् हरणे" व्यतिहरन्ते, ९९६ "वहीं प्रापणे" व्यतिवहन्ते भारम्। एतद्रूपाणि प्रथमभागे प्रदर्शितानि।

"निविशः" [ ३. ३. २४. ] इति निपूर्वात् १४१५ "विशंत् प्रवेशने" इत्यतः कर्तर्यात्मनेपदं भवति—

व० निवि—शते, शेते, शन्ते; शसे, शेथे, शध्वे; शे, शावहे, शामहे।

स० निविशे—त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि।

प० निवि—शताम्, शेताम्, शन्ताम्; शस्व, शेथाम्, शध्वम्; शै, शावहै, शामहै।

ह्य० न्यवि—शत, शेताम्, शन्त; शथाः, शेथाम्, शध्वम्; शे, शावहि, शामहि।

अ० न्यवि—क्षत, क्षाताम्, क्षन्त; क्षथाः, क्षाथाम्, क्षध्वम्; क्षि, क्षावहि, क्षामहि।

प० निविवि—शे, शाते, शिरे; शिषे, शाथे, शिध्वे; शे, शिवहे, शिमहे।

आ० निविक्षी—ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ध्वम्; य, वहि, महि।

श्व० निवेष्टा—", रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे।

भ० निवे—क्ष्यते, क्ष्येते, क्ष्यन्ते; क्ष्यसे, क्ष्येथे, क्ष्यध्वे; क्ष्ये, क्ष्यावहे, क्ष्यामहे।

क्रि० न्यवे—क्ष्यत, क्ष्येताम्, क्ष्यन्त; क्ष्यथाः, क्ष्येथाम्, क्ष्यध्वम्; क्ष्ये, क्ष्यावहि, क्ष्यामहि॥

"उपसर्गादस्योहो वा" [ ३. ३. २५ ] इति सोपसर्गात् १२२१ "असूच् क्षेपणे" इत्यतः कर्तरि वात्मनेपदं भवति—

व० विपर्य – स्यते, स्येते, स्यन्ते; स्यसे, स्येथे, स्यध्वे; स्ये, स्यावहे, स्यामहे ।

स० विपर्यस्ये – त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० विपर्य – स्यताम्, स्येताम्, स्यन्ताम्; स्यस्व, स्येथाम्, स्यध्वम्; स्यै, स्यावहै, स्यामहै ।

ह्य० विपर्या – स्यत, स्येताम्, स्यन्त; स्यथाः, स्येथाम्; स्यध्वम्; स्ये, स्यावहि, स्यामहि ।

अ० विपर्या – स्थत, स्थेताम्, स्थन्त; स्थथाः, स्थेथाम्, स्थध्वम्; स्थे, स्थावहि, स्थामहि ।

प० विपर्या – से, साते, सिरे; सिषे, साथे, सिध्वे; से, सिवहे, सिमहे ।

आ० विपर्यसिषी – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ध्वम्; य, वहि, महि ।

श्व० विपर्यसिता – ", रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० विपर्यसि – ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे ।

क्रि० विपर्यासि – ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ॥

"उत्स्वराद् युजेरयज्ञतत्पात्रे" [ ३. ३. २६. ] इति उदः स्वरान्ताच्चोपसर्गाद् परात् १४७६ "युजृंपी योगे" इत्यस्मात् कर्तर्यात्मनेपदं भवति, यथा–उद्युङ्क्ते, उपयुङ्क्ते, एतद्रूपाणि प्रथमभागे दार्शितानि ॥

"परिव्यवात् क्रियः" [ ३. ३. २७. ] इति परिव्यवपूर्वात् १५०८ "डुक्रींग्श् द्रव्यविनिमये" इत्यतः कर्तर्यात्मनेपदं भवति, यथा—परिक्रीणीते, विक्रीणीते, अवक्रीणीते, एतद्रूपाणि प्रथमभागे प्रदर्शितानि ॥

"परावेर्जेः" [ ३. ३. २८. ] इति परा-विपूर्वात् ८ "जिं अभिभवे" इत्यतः कर्तर्यात्मनेपदं भवति—

व० पराज – यते, येते, यन्ते; यसे, येथे; यध्वे; ये, यावहे, यामहे ।

स० पराजये – त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० पराज – यताम्, येताम्, यन्ताम्; यस्व, येथाम्, यध्वम्; यै, यावहै, यामहै ।

ह्य० पराज – यत, येताम्, यन्त, यथाः, येथाम्, यध्वम्; ये, यावहि, यामहि ।

अ० पराजे – ष्ट, षाताम्, षत; ष्ठाः, षाथाम्, इढ्वम्, ढ्वम्; षि, ष्वहि, ष्महि ।

प० पराजि – ग्ये, ग्याते, ग्यिरे; ग्यिषे, ग्याथे, ग्यिढ्वे, ग्यिध्वे; ग्ये, ग्यिवहे, ग्यिमहे ।

आ० पराजेषी – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ढ्वम्; य, वहि, महि ।

भ० पराजे – ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे ।

क्रि० पराजे – ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ॥

**एवं – विजयते, विजयेत, विजयताम्, व्यजयत, व्यजेष्ट, विजिग्ये, विजेषीष्ट, विजेष्यते, व्यजेष्यत, इत्यादि ॥**

**"समः क्ष्णोः" [ ३. ३. २९. ] इति सम्पूर्वात् १०८१ "क्ष्णुक् तेजने" इत्यतः कर्तर्यात्मनेपदं भवति—**

प० संक्ष्णु – ते, वाते, वते; षे, वाथे, ध्वे; वे, वहे, महे ।

स० संक्ष्णुवी – त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० संक्ष्णु – ताम्, वाताम्, वताम्; ष्व, वाथाम्, ध्वम्; संक्ष्णवै, संक्ष्णवावहै, महै ।

ह्य० समक्ष्णु – त, वाताम्, वत; थाः, वाथाम्, ध्वम्; वि, वहि, महि ।

अ० समक्ष्णवि – ष्ट, षाताम्, षत; ष्ठाः, षाथाम्, इढ्वम्, ढ्वम्, ध्वम्; षि, ष्वहि, ष्महि ।

प० संचुक्ष्णु – वे, वाते, विरे; विषे, वाथे, विढ्वे, ध्वे; वे, विवहे, विमहे ।

आ० संक्ष्णविषी – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ढ्वम्–ध्वम्; य, वहि, महि ।

श्व० संक्ष्णविता-”, रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० संक्ष्णवि-ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे ।

क्रि० समक्ष्णवि-ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ॥

“अपस्किरः” [ ३. ३. ३०. ] इति अपपूर्वात् सस्सङ्कात् १३३४ “कृत् विक्षेपे” इत्यतः कर्तर्यात्मनेपदं भवति—

व० अपस्कि-रते, रेते, रन्ते; रसे, रेथे, रध्वे; रे, रावहे, रामहे ।

स० अपस्किरे-त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० अपस्कि-रताम्, रेताम्, रन्ताम्; रस्व, रेथाम्, रध्वम्; रै, रावहै, रामहै ।

ह्य० अपास्कि-रत, रेताम्, रन्त; रथाः, रेथाम्, रध्वम्; रे, रावहि, रामहि ।

अ० अपास्करि / अपास्करी } -ष्ट, षाताम्, षत; ष्ठाः, षाथाम्, ड्ढ्वम्, ढ्वम्; ध्वम्; षि, ष्वहि, ष्महि ।

अपास्की-र्ष्ट, र्षाताम्, र्षत; र्ष्ठाः, र्षाथाम्, र्ड्ढ्वम्, र्ढ्वम्; र्षि, र्ष्वहि, र्ष्महि ।

प० अपचस्क-रे, राते, रिरे; रिषे, राथे, रिढ्वे, रिध्वे; रे, रिवहे, रिमहे ।

आ० अपस्करिषी / अपस्करीषी } -ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ढ्वम्, ध्वम्; य, वहि, महि ।

अपस्कीर्षी-ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ढ्वम्; य, वहि, महि ।

श्व० अपस्करिता / अपस्करीता } -”, रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० अपस्करि / अपस्करी } -ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे ।

क्रि० अपास्करि / अपास्करी } -ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ।

"उदश्चरः साप्यात्" [ ३. ३. ३१. ] इति उपूर्वात् सकर्मकात् ४१० "चर गतिभक्षणयोः" इत्यतः कर्तर्यात्मनेपदं भवति, मार्गमुच्चरते, एवं "समस्तृतीयया" [ ३. ३. ३२. ] इत्यनेन तृतीयान्तेन योगेऽस्मादेव कर्तर्यात्मनेपदं भवति, अश्वेन संचरते। तत्रोत्पूर्वस्य रूपाणि—

व० उच्च–रते, रेते, रन्ते; रसे, रेथे, रध्वे; रे, रावहे, रामहे।
स० उच्चरे–त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि।
प० उच्च–रताम्, रेताम्, रन्ताम्; रस्व, रेथाम्, रध्वम्; रै, रावहै, रामहै।
ह्य० उदच–रत, रेताम्, रन्त; रथाः, रेथाम्, रध्वम्; रे, रावहि, रामहि।
अ० उदचरि–ष्ट, षाताम्, षत; ष्ठाः, षाथाम्, ड्ढ्वम्, ढ्वम्, ध्वम्; षि, ष्वहि, ष्महि।
प० उच्चे–रे, राते, रिरे; रिषे, राथे, रिढ्वे, रिध्वे; रे, रिवहे, रिमहे।
आ० उच्चरिषी–ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ढ्वम्, ध्वम्; य, वहि, महि।
श्व० उच्चरिता–", रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे।
भ० उच्चरि–ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे।
क्रि० उदचरि–ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि॥

एवं सम्पूर्वकस्य–संचरते, संचरेत, संचरताम्, समचरत, समचरिष्ट, संचेरे, संचरिषीष्ट, संचरिता, संचरिष्यते, समचरिष्यत, इत्यादि॥

"क्रीडोऽकूजने" [ ३. ३. ३३. ] इति कूजनभिन्नार्थात् सम्पूर्वात् २४३ "क्रीडृ विहारे" इत्यतः कर्तर्यात्मनेपदं भवति–संक्रीडते, "अन्वाङ्परेः" [ ३. ३. ३४. ] इति अन्वाङ्परिभ्यः परादस्मादेव कर्तर्यात्मनेपदं भवति–अनुक्रीडते, आक्रीडते, परिक्रीडते। तत्र सम्पूर्वस्य —

व० संक्री–डते, डेते, डन्ते; डसे, डेसे, डध्वे; डे, डावहे, डामहे।
स० संक्रीडे–त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि।
प० संक्री–डताम्, डेताम्, डन्ताम्; डस्व, डेथाम्, डध्वम्; डै, डावहै, डामहै।

ह्य० समक्री-डत, डेताम्, डन्त; डथाः, डेथाम्, डध्वम्; डे, डावहि, डामहि ।

अ० समक्रीडि-ष्ट, षाताम्, षत; ष्ठाः, षाथाम्, ड्ढ्वम्, ध्वम्; षि, ष्वहि, ष्महि ।

प० संचिक्री-डे, डाते, ड़िरे; डिषे, डाथे, डिध्वे; डे, डिवहे, डिमहे ।

आ० संक्रीडिषी-ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ध्वम्; य, वहि, महि ।

श्व० संक्रीडिता-", रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० संक्रीडि-ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे ष्यामहे ।

क्रि० समक्रीडि-ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ॥

"शप उपलम्भने" [ ३. ३. ३५. ] इति शपथार्थात् प्रकाशनार्थाच्च ९१६ "शपीं आक्रोशे" इत्यतः कर्तर्यात्मनेपदं भवति, एतद्रूपाणि च प्रथमभागे दर्शितानि ॥

"आशिषि नाथः" [ ३. ३. ३६. ] इति आशिषि ७१६ "नाथृङ् उपतापैश्वर्याशीःषु च" इत्यतः कर्तर्यात्मनेपदं भवति, एतद्रूपाणि प्रथमभागे दर्शितानि ॥

"भुनजोऽत्राणे" [ ३. ३. ३७. ] इति पालनभिन्नार्थात् १४८७ "भुजंप् पालनाभ्यवहारयोः" इत्यतः कर्तर्यात्मनेपदं भवति, एतद्रूपाणि प्रथमभागे दर्शितानि ॥

"हृगो गतताच्छील्ये" [ ३. ३. ३८. ] इति गतताच्छील्यार्थात् ८८५ "हृंग् हरणे" इत्यतः कर्तर्यात्मनेपदं भवति, पैतृकमश्वा अनुहरन्ते, पितुरनुहरन्ते, एतद्रूपाणि प्रथमभागे दर्शितानि ॥

"पूजाऽऽचार्यक-भृत्युत्क्षेप-ज्ञान-विगणन-व्यये नियः" [ ३. ३. ३९. ] इति पूजादिषु गम्येषु ८८४ "णींग् प्रापणे" इत्यतः कर्तर्यात्मनेपदं भवति, यथा-नयते विद्वान् स्याद्वादे, माणवकमुपनयते, कर्मकरानुपनयते, शिशुमुदानयते, नयते तत्त्वार्थे, मद्राः कारं विनयन्ते, शतं विनयते, एवं-"कर्तृस्थामूर्ताप्यात्" [ ३. ३. ४० ] इति कर्तृस्थामूर्ताप्यादस्मादेव कर्तर्यात्मनेपदं भवति, यथा-श्रमं विनयते, एतद्रूपाणि प्रथमभागे दर्शितानि ॥

"शदेः शिति" [ ३. ३. ४१. ] इति शिद्विषयात् ९६७ "शद्लृं शातने" इत्यतः कर्तर्यात्मनेपदं भवति, एतद्रूपाणि प्रथमभागे दर्शितानि ॥

"म्रियतेरद्यतन्याशिषि च" [ ३. ३. ४२. ] १३३३ "मृंत् प्राणत्यागे" इत्यतोऽद्यतन्याशीर्विषयात् शिद्विषयाच्च कर्तर्यात्मनेपदं भवति, एतद्रूपाणि प्रथमभागे दर्शितानि ॥

"क्यङ्षो नवा" [ ३. ३. ४३. ] इति क्यङ्षन्तात् कर्तर्यात्मनेपदं वा भवति, यथा – निद्रायते, निद्रायति, एतद्रूपाणि षष्ठभागे दर्शितानि ॥

"द्युद्भ्योऽद्यतन्याम्" [ ३. ३. ४४. ] इति द्युतादिभ्योऽद्यतनीविषये कर्तर्यात्मनेपदं वा भवति, एतद्रूपाणि प्रथमभागे दर्शितानि ॥

"वृद्भ्यः स्य-सनोः" [ ३. ३. ४५. ] इति वृदादेः पञ्चतः स्यादौ प्रत्यये सनि च विषये कर्तर्यात्मनेपदं वा भवति, एतद्रूपाणि प्रथमे तृतीये च भागे दर्शितानि ॥

"कृपः श्वस्तन्याम्" [ ३. ३. ४६. ] इति श्वस्तनीविषये ९५९ "कृपौङ् सामर्थ्ये" इत्यतः कर्तर्यात्मनेपदं वा भवति, एतद्रूपाणि च प्रथमभागे दर्शितानि ॥

"क्रमोऽनुपसर्गात्" [ ३. ३. ४७. ] इति अविद्यमानोपसर्गात् ३८५ "क्रमू पादविक्षेपे" इत्यतः कर्तर्यात्मनेपदं वा भवति–क्रमते, क्रामति । एवं– "वृत्तिसर्गतायने" [ ३. ३. ४८. ] इति वृत्तिसर्गतायनार्थादस्मादेव कर्तर्यात्मनेपदं भवति, शास्त्रेऽस्य क्रमते बुद्धिः, सूत्राय क्रमते, क्रमन्तेऽस्मिन् योगाः । एवं – "परोपात्" [ ३. ३. ४९. ] परोपपूर्वात् वृत्त्याद्यर्थादस्मादेव कर्तर्यात्मनेपदं भवति–पराक्रमते, उपक्रमते । एवं – "वेः स्वार्थे" [ ३. ३. ५०. ] इति विपूर्वात् पादविक्षेपार्थादस्मादेव कर्तर्यात्मनेपदं भवति–साधु विक्रमते गजः । एवं – "प्रोपादारम्भे" [ ३. ३. ५१. ] इति प्रोपाभ्यां परादारम्भार्थादस्मादेव कर्तर्यात्मनेपदं भवति–प्रक्रमते, उपक्रमते, भोक्तुम् ।

एवं–"आङो ज्योतिरुद्गमे" [ ३. ३. ५२. ] इति आङः पराच्चन्द्राद्युद्गमार्थादस्मादेव कर्तर्यात्मनेपदं भवति–आक्रमते चन्द्रः सूर्यो वा, रूपाणि—

व० क्र – मते, मेते, न्ते; मसे, मेथे, मध्वे; मे, मावहे, मामहे ।

स० क्रमे – त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० क्र – मताम्, मेताम्, मन्ताम्; मस्व, मेथाम्, मध्वम्; मै, मावहै, मामहै ।

ह्य० अक्र – मत, मेताम्, मन्त; मथाः, मेथाम्, मध्वम्; मे, मावहि, मामहि ।

अ० अक्रमि – ष्ट, षाताम्, षत; ष्ठाः, षाथाम्, इढ्वम्, ध्वम्; षि, ष्वहि, ष्महि ।

प० चक्र – मे, माते, मिरे; मिषे, माथे, मिध्वे; मे, मिवहे, मिमहे ।

आ० क्रमिषी – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ध्वम्; य, वहि, महि ।

श्व० क्रमिता – ", रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० क्रमि – ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे ।

क्रि० अक्रमि – ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ॥

"दागोऽस्वास्यप्रसार-विकासे" [ ३. ३. ५३. ] इति स्वास्यप्रसार-विकासाभ्यामन्यार्थाद् आङ्पूर्वात् ११३७ "डुदांग्क् दाने" इत्यतः कर्तर्यात्मनेपदं भवति–विद्यामादत्ते । एतद्रूपाणि प्रथमभागे प्रदर्शितानि ॥

"नु-प्रच्छः" [ ३. ३. ५४.] इति आङ्पूर्वात् १०३० "णुक् स्तुतौ" इत्यतः १३४७ "प्रछंत् ज्ञीप्सायाम्" इत्यतश्च कर्तर्यात्मनेपदं भवति–आनुते शृगालः, आपृच्छते गुरून्; तत्र प्रथमस्य रूपाणि—

व० आनु – ते, वाते, वते; षे, वाथे, ध्वे; वे, वहे, महे ।

स० आनुवी – त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० आनु – ताम्, वाताम्, वताम्; ष्व, वाथाम्, ध्वम्; आन-वै, वावहै, वामहै ।

ह्य० आनु – त, वाताम्, वत; थाः, वाथाम्, ध्वम्; वि, वहि, महि ।

अ० आनवि – ष्ट, षाताम्, षत; ष्ठाः, षाथाम्, इढ्वम्, ढ्वम्, ध्वम्; षि, ष्वहि, ष्महि ।

प० आनुनु – वे, वाते, विरे; विषे, वाथे, विढ्वे, ध्वे; वे, विवहे, विमहे ।

आ० आनविषी – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ढ्वम्, ध्वम्; य, वहि, महि ।

श्व० आनविता – ”, रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० आनवि – ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे ।

क्रि० आनवि – ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ॥

द्वितीयस्य रूपाणि—

व० आपृ – च्छते, च्छेते, च्छन्ते; च्छसे, च्छेथे, च्छध्वे; च्छे, च्छावहे, च्छामहे ।

स० आपृच्छे – त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० आपृ – च्छताम्, च्छेताम्, च्छन्ताम्; च्छस्व, च्छेथाम्, च्छध्वम्; च्छै, च्छावहै, च्छामहै ।

ह्य० आपृ – च्छत, च्छेताम्, च्छन्त; च्छथाः, च्छेथाम्, च्छध्वम्; च्छे, च्छावहि, च्छामहि ।

अ० आप्र – ष्ट, क्षाताम्, क्षत; ष्ठाः, क्षाथाम्, ड्ढ्वम्, ढ्वम्; क्षि, क्ष्वहि, क्ष्महि ।

प० आपप्र – च्छे, च्छाते, च्छिरे; च्छिषे, च्छाथे, च्छिध्वे; च्छे, च्छिवहे, च्छिमहे ।

आ० आप्रक्षी – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ध्वम्; य, वहि, महि ।

श्व० आप्रष्टा – ”, रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० आप्र – क्ष्यते, क्ष्येते, क्ष्यन्ते; क्ष्यसे, क्ष्येथे, क्ष्यध्वे; क्ष्ये, क्ष्यावहे, क्ष्यामहे ।

क्रि० आप्र – क्ष्यत, क्ष्येताम्, क्ष्यन्त; क्ष्यथाः, क्ष्येथाम्, क्ष्यध्वम्; क्ष्ये, क्ष्यावहि, क्ष्यामहि ॥

एवमिमान्येव रूपाणि सम्पूर्वस्यापि ज्ञेयानि, यतः "समो गमृच्छि-प्रच्छि" [ ३. ३. ८४. ] इत्यनेन कर्मण्यसति कर्तर्यात्मनेपदं विधीयते ॥

"गमेः क्षान्तौ" [ ३. ३. ५५. ] इति कालहरणार्थाद् णिगन्ताद् ३९६ "गम्लृं गतौ" इत्यतः कर्तर्यात्मनेपदं भवति–आगमयते गुरुं, कञ्चित् कालं प्रतीक्षते । एतद्रूपाणि द्वितीयभागे दर्शितानि ॥

"ह्वः स्पर्धे" [ ३. ३. ५६. ] इति स्पर्धे गम्ये आङ्पूर्वात् ९९४ "ह्वेंग् स्पर्धाशब्दयोः" इत्यतः कर्तर्यात्मनेपदं भवति–मल्लो मल्लमाह्वयते। एवं–"सं-नि-वेः" [ ३. ३. ५७. ] इति सं-नि-विपूर्वात्, तथा "उपात्" [ ३. ३. ५८. ] इत्युपपूर्वाच्चास्मादेव कर्तर्यात्मनेपदं भवति–संह्वयते, निह्वयते, विह्वयते, उपह्वयते, प्रथमभागे रूपाणि दर्शितानि।

"यमः स्वीकारे" [ ३. ३. ५९. ] इति उपपूर्वात् स्वीकारार्थात् ३८६ "यमूं उपरमे" इत्यतः कर्तर्यात्मनेपदं भवति–कन्यामुपयच्छते, उपायंस्त महास्त्राणि, एवम्–"आङो यमहनः स्वेऽङ्गे च" [ ३. ३. ८६. ] इत्याङ्पूर्वादस्मादेव कर्मण्यसति, कर्तुः स्वेङ्गे च कर्मणि, कर्तर्यात्मनेपदं भवति–आयच्छते पाणिं, दीर्घीकरोतीत्यर्थः, तथा "समुदाङो यमेरग्रन्थे" [ ३. ३. ९८. ] समादिपूर्वादस्मादेवाग्रन्थविषये फलवत्कर्तर्यात्मनेपदं भवति–संयच्छते व्रीहीन्, उद्यच्छते भारम्, आयच्छते भारम्, "पदान्तरगम्ये वा" [ ३. ३. ९९. ] इति प्रस्तुतसूत्रोक्तं यदात्मनेपदं तत् पदान्तरगम्ये फलवत्कर्तरि वा भवति–व्रीहीन् संयच्छते, संयच्छति वा। एतद्रूपाणि—

व० उपय–च्छते, च्छेते, च्छन्ते; च्छसे, च्छेथे, च्छध्वे; च्छे, च्छावहे, च्छामहे।

स० उपयच्छे–त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि।

प० उपय–च्छताम्, च्छेताम्, च्छन्ताम्; च्छस्व, च्छेथाम्, च्छध्वम्; च्छै, च्छावहै, च्छामहै।

ह्य० उपाय–च्छत, च्छेताम्, च्छन्त; च्छथाः, च्छेथाम्, च्छध्वम्; च्छे, च्छावहि, च्छामहि।

अद्यतन्यां त्रिधा रूपाणि, तत्र सूचनार्थे—

१ उपाय–त, साताम्, सत; थाः, साथाम्, ढ्वम्, ध्वम्; सि, स्वहि, स्महि।

स्वीकारार्थे–२ उपा–यत, यंस्त, यसाताम्, यंसाताम्, यसत, यंसत; यथाः, यंस्थाः, यसाथाम्, यंसाथाम्, यध्वम्-यद्ध्वम्-यन्ध्वम्; यसि, यंसि, यस्वहि-यंस्वहि, यस्महि-यंस्महि।

सूचनस्वीकाराभ्यामन्यत्र–३ आयं-स्त, साताम्, सत; स्थाः, साथाम्, आयन्द्ध्वम्-आयन्ध्वम्; आयं–सि, स्वहि, स्महि।

प० उपर्ये – मे, माते, मिरे; मिषे, माथे, मिध्वे; मे, मिवहे, मिमहे ।
आ० उपर्यंसी – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ध्वम्; य, वहि, महि ।
श्व० उपयन्ता – ”, रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।
भ० उपयं – स्यते, स्येते, स्यन्ते; स्यसे, स्येथे, स्यध्वे; स्ये, स्यावहे, स्यामहे ।
क्रि० उपायं – स्यत, स्येताम्, स्यन्त; स्यथाः, स्येथाम्, स्यध्वम्; स्ये, स्यावहि, स्यामहि ॥

“देवा-ऽर्चा-मैत्री-सङ्गम-पथिकर्तृक-मन्त्रकरणे स्थः” [ ३. ३. ६०. ] इति देवार्चादिषु उपपूर्वात् ५ “ष्ठां गतिनिवृत्तौ” इत्यतः कर्तर्यात्मनेपदं भवति– जिनेन्द्रमुपतिष्ठते, रथिकानुपतिष्ठते, यमुना गङ्गामुपतिष्ठते, स्रुघ्नमुपतिष्ठते पन्थाः, ऐन्द्र्या गार्हपत्यमुपतिष्ठते; एवं – “वा लिप्सायाम्” [ ३. ३. ६१. ] इत्युपपूर्वादस्मादेव लिप्सायां गम्यमानायां कर्तर्यात्मनेपदं वा भवति–भिक्षुर्दातृकुलमुपतिष्ठते उपतिष्ठति वा; तथा – “उदोऽनूर्ध्वेहे” [ ३. ३. ६२. ] इत्यनूर्ध्वचेष्टार्थादुपपूर्वादस्मादेव कर्तर्यात्मनेपदं भवति–मुक्तावुपतिष्ठते; “सं-वि-प्राऽवात्” [ ३. ३. ६३. ] समादिपूर्वादस्मादेव कर्तर्यात्मनेपदं भवति–संतिष्ठते, वितिष्ठते, प्रतिष्ठते, अवतिष्ठते; “ज्ञी-प्सा-स्थेये” [ ३. ३. ६४. ] इत्यात्मप्रकाशने सभ्यविषये चास्मादेव कर्तर्यात्मनेपदं भवति–तिष्ठते कन्या छात्रेभ्यः, त्वयि तिष्ठते विवादः; “प्रतिज्ञायाम्” [ ३. ३. ६५. ] इत्यभ्युपगमार्थादस्मादेव कर्तर्यात्मनेपदं भवति–नित्यं शब्दमातिष्ठते; “उपात् स्थः” [ ३. ३. ८३. ] इत्युपपूर्वादस्मादेव कर्मण्यसति कर्तर्यात्मनेपदं भवति, योगे योग उपतिष्ठते । रूपाणि चास्य—

व० ति – ष्ठते, ष्ठेते, ष्ठन्ते; ष्ठसे, ष्ठेथे, ष्ठध्वे; ष्ठे, ष्ठावहे, ष्ठामहे ।
स० तिष्ठे – त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।
प० ति – ष्ठताम्, ष्ठेताम्, ष्ठन्ताम्; ष्ठस्व, ष्ठेथाम्, ष्ठध्वम्; ष्ठै, ष्ठावहै, ष्ठामहै ।
ह्य० अति – ष्ठत, ष्ठेताम्, ष्ठन्त; ष्ठथाः, ष्ठेथाम्, ष्ठध्वम्; ष्ठे, ष्ठावहि, ष्ठामहि ।
अ० अस्थि – त, षाताम्, षत; थाः, षाथाम्, ड्ढ्वम्, ढ्वम्; षि, ष्वहि, ष्महि ।
प० त – स्थे, स्थाते, स्थिरे; स्थिषे, स्थाथे, स्थिध्वे; स्थे, स्थिवहे, स्थिमहे ।
आ० स्थासी – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ध्वम्; य, वहि, महि ।
श्व० स्थाता – ”, रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० स्था – स्यते, स्येते, स्यन्ते; स्यसे, स्येथे, स्यध्वे; स्ये, स्यावहे, स्यामहे ।

क्रि० अस्था – स्यत, स्येताम्, स्यन्त; स्यथाः, स्येथाम्, स्यध्वम्; स्ये, स्यावहि, स्यामहि ॥

"समो गिरः" [ ३. ३. ६६. ] इति सम्पूर्वात् प्रतिज्ञार्थात् १३३५ "गॄ निगरणे" इत्यतः कर्तर्यात्मनेपदं भवति–स्याद्वादं संगिरते; एवं "अवात्" [ ३. ३. ६७. ] इत्यवपूर्वादस्मादेव कर्तर्यात्मनेपदं भवति–अवगिरते ।

रूपाणि चास्य—

व० संगि – रते, रेते, रन्ते; रसे, रेथे, रध्वे; रे, रावहे, रामहे ।

स० संगिरे – त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० संगि – रताम्, रेताम्, रन्ताम्; रस्व, रेथाम्, रध्वम्; रै, रावहै, रामहै ।

ह्य० समगि – रत, रेताम्, रन्त; रथाः, रेथाम्, रध्वम्; रे, रावहि, रामहि ।

अ० समगरि / समगरी } – ष्ट, षाताम्, षत; ष्ठाः, षाथाम्, ड्ढ्वम्, ढ्वम्, ध्वम्; षि, ष्वहि, ष्महि ।

समगी – र्ष्ट, र्षाताम्, र्षत; र्ष्ठाः, र्षाथाम्, र्ड्ढ्वम्, र्ढ्वम्; र्षि, र्ष्वहि, र्ष्महि ।

प० संजग – रे, राते, रिरे; रिषे, राथे, रिढ्वे, रिध्वे; रे, रिवहे, रिमहे ।

आ० संगरिषी / संगरीषी } – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ढ्वम्, ध्वम्; य, वहि महि ।

– संगीर्षी – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ढ्वम्; य, वहि, महि ।

श्व० संगरिता / संगरीता } – ", रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० संगरि / संगरी } – ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्यथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे ।

क्रि० समगरि / समगरी } – ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ॥

एषु यत्र यत्र धात्वंशे रकारोत्तरः स्वरस्तत्र तत्र रकारस्य लकारोऽपि भवति, यथा – संगिलते, संगिलेत, संगिलताम्, समगिलत, समगलिष्ट, समगलीष्ट, संजगले, संगलिषीष्ट, संगलीषीष्ट, संगलिता, संगलीता, संगलिष्यते, संगलीष्यते, समगलिष्यत, समगलीष्यत ॥

"निह्नवे ज्ञः" [ ३. ३. ६८. ] इत्यपलापार्थात् १५४० "ज्ञांश् अवबोधने" इत्यतः कर्तर्यात्मनेपदं भवति-शतमपजानीते; एवं - "सम्प्रतेरस्मृतौ" [ ३. ३. ६९. ] इत्यस्मृत्यर्थात् सम्प्रतिपूर्वादस्मादेव कर्तर्यात्मनेपदं भवति-शतं संजानीते, शतं प्रतिजानीते; तथा "अननोः सनः" [ ३. ३. ७०. ] इत्यननुपूर्वात् सन्नन्तादस्मादेव कर्तर्यात्मनेपदं भवति-धर्मं जिज्ञासते, एतद्रूपाणि तृतीयभागे दर्शितानि; "ज्ञः" [ ३. ३. ८२. ] इति कर्मण्यसति कर्तर्यात्मनेपदं भवति-सर्पिषो जानीते; "ज्ञोऽनुपसर्गात्" [ ३. ३. ९६. ] उपसर्गरहितादस्मादेव फलवत्कर्तर्यात्मनेपदं भवति-गां जानीते; "पदान्तरगम्ये वा" [ ३. ३. ९९. ] इति पदान्तरगम्ये फलवत्कर्तर्यात्मनेपदं वा भवति-स्वां गां जानीते जानाति वा । एतद्रूपाणि—

व० जा - नीते, नाते, नते; नीषे, नाथे, नीध्वे; ने, नीवहे, नीमहे ।

स० जानी - त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० जा - नीताम्, नाताम्, नताम्; नीष्व, नाथाम्, नीध्वम्; नै, नावहै, नामहै ।

ह्य० अजा - नीत, नाताम्, नत; नीथाः, नाथाम्, नीध्वम्; नि, नीवहि, नीमहि ।

अ० अज्ञा - स्त, साताम्, सत; स्थाः, साथाम्, द्ध्वम्, ध्वम्; सि, स्वहि, स्महि ।

प० ज - ज्ञे, ज्ञाते, ज्ञिरे; ज्ञिषे, ज्ञाथे, ज्ञिध्वे; ज्ञे, ज्ञिवहे, ज्ञिमहे ।

आ० ज्ञासी - ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ध्वम्; य, वहि, महि ।

श्व० ज्ञाता - ", रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० ज्ञा - स्यते, स्येते, स्यन्ते; स्यसे, स्येथे, स्यध्वे; स्ये, स्यावहे, स्यामहे ।

क्रि० अज्ञा - स्यत, स्येताम्, स्यन्त; स्यथाः, स्येथाम्, स्यध्वम्; स्ये, स्यावहि, स्यामहि ।

"श्रुवोऽनाङ् - प्रतेः" [ ३. ३. ७१. ] इति सन्नन्तात् आङ्प्रतिरहितात् १२९६ "श्रुंट् श्रवणे" इत्यतः कर्तर्यात्मनेपदं भवति-शुश्रूषते गुरून्, एतद्रूपाणि तृतीयभागे दर्शितानि ॥

"स्मृ-दृशः" [ ३. ३. ७२. ] १८ "स्मृ चिन्तायाम्" इत्यतः ४९५ "दृशिँर् प्रेक्षणे" इत्यतश्च सन्नन्तात् कर्तर्यात्मनेपदं भवति–सुस्मूर्षते, दिदृक्षते, एतद्रूपाणि तृतीयभागे दर्शितानि, तत्र द्वितीयस्य परस्मैपदरूपाण्यपहाय तत्स्थाने इमानि ज्ञेयानि—

व० दिदृ – क्षते, क्षेते, क्षन्ते; क्षसे, क्षेथे, क्षध्वे; क्षे, क्षावहे, क्षामहे ।

स० दिदृक्षे – त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० दिदृ – क्षताम्, क्षेताम्, क्षन्ताम्; क्ष्व, क्षेथाम्, क्षध्वम्; क्षै, क्षावहै, क्षामहै ।

ह्य० अदिदृ – क्षत, क्षेताम्, क्षन्त; क्षथाः, क्षेथाम्, क्षध्वम्; क्षे, क्षावहि, क्षामहि ।

अ० अदिदृक्षि – ष्ट, षाताम्, षत; ष्ठाः, षाथाम्, ड्ढ्वम्, ध्वम्; षि, ष्वहि, ष्महि ।

प० दिदृक्षाञ्च – क्रे, क्राते, क्रिरे; कृषे, क्राथे, कृढ्वे; क्रे, कृवहे, कृमहे । दिदृक्षाम्बभूव, दिदृक्षामास, इत्यादि ।

आ० दिदृक्षी – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ध्वम्; य, वहि, महि ।

श्व० दिदृक्षिता – ", रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० दिदृक्षि – ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे ।

क्रि० अदिदृक्षि – ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ॥

"शको जिज्ञासायाम्" [ ३. ३. ७३. ] इति ज्ञानानुसंहितार्थात् सन्नन्तात् १२८० "शकींच् मर्षणे" इत्यतः १३०० "शक्लृंट् शक्तौ" इत्यतश्च कर्तर्यात्मनेपदं भवति–विद्याः शिक्षते, ज्ञातुं शक्नुयामीतीच्छतीत्यर्थः, रूपाणि चास्य तृतीयभागे दर्शितानि ॥

"प्राग्वत्" [ ३. ३. ७४. ] इति सनः पूर्वो यो धातुस्तस्मादिव सन्नन्तात् कर्तर्यात्मनेपदं भवति, यथा १००५ "शीङ्क् स्वप्ने" इत्यस्य सनि शिशयिषते इत्यादि । एतद्रूपाणि तृतीयभागे दर्शितानि ॥

"आमः कृगः" [ ३. ३. ७५. ] इति आमः परादनुप्रयुक्तात् ८८८ "डुकृंग् करणे" इत्यत आम एव प्राग् यो धातुस्तस्मादिव स्यात्, भवति न भवति चेति विधिनिषेधावतिदिश्येते, ईहाञ्चक्रे, विभयाञ्चकार, एतद्रूपाणि प्रथमभागे दर्शितानि ।

"गन्धना-ऽवक्षेप-सेवा-साहस-प्रतियत्न-प्रकथनोपयोगे" [ ३. ३. ७६. ] इति गन्धनार्थात् ८८८ "डुकृंग् करणे" इत्यतः कर्तर्यात्मनेपदं भवति- गन्धनं—द्रोहेण परदोषोद्घाटनम्, उत्कुरुते; अवक्षेपः—कुत्सनम्, दुर्वृत्तानवकुरुते, सेवा—महामात्रानुपकुरुते; साहसम्—अविमृश्य प्रवृत्तिः, परदारान् प्रकुरुते; प्रतियत्नः—गुणान्तराधानम्, एधोदकस्योपस्कुरुते; प्रकथनं—जनवादान् प्रकुरुते; उपयोगः—धर्मादौ विनियोगः, शतं प्रकुरुते । एवमस्मादेवाधिपूर्वात् प्रसहनार्थात् "अधेः प्रसहने" [ ३. ३. ७७. ] इति कर्तर्यात्मनेपदं भवति, प्रहसनं—पराभिभवः परेणापराजयो वा, तं हाऽधिचक्रे । "वेः कृगः शब्दे चानाशे" [ ३. ३. ८५. ] इति अनाशाद् विपूर्वादस्मादेव कर्मण्यसति शब्दे च कर्मणि, कर्तर्यात्मनेपदं भवति—विकुर्वते सैन्धवाः, क्रोष्टा विकुरुते स्वरान् । अस्य रूपाणि प्रथमभागे प्रदर्शितानि ॥

एवं "मिथ्याकृगोऽभ्यासे" [ ३. ३. ९३. ] इति मिथ्यायुक्तादस्मादेव ण्यन्तात् क्रियाभ्यासवृत्त्यर्थात् कर्तर्यात्मनेपदं भवति—पदं मिथ्या कारयते, एतद्रूपाणि द्वितीयभागे दर्शितानि ॥

"दीप्ति-ज्ञान-यत्न-विमत्युपसंभाषोपमन्त्रणे वदः" [ ३. ३. ७८. ] इति दीप्त्यादिषु गम्येषु ९९८ "वद व्यक्तायां वाचि" इत्यतः कर्तर्यात्मनेपदं भवति—वदते विद्वान् स्याद्वादे, वदते धीमांस्तत्त्वार्थे, तपसि वदते, नानामतिर्विमतिः, धर्मे विवदन्ते, उपसंभाषा—उपसान्त्वनम्, कर्मकरानुपवदते, कुलभार्यामुपवदते । एवम्—"व्यक्तवाचां सहोक्तौ" [ ३. ३. ७९. ] इति व्यक्तवाचां सहोक्तावस्मादेव कर्तर्यात्मनेपदं भवति—सम्प्रवदन्ते ग्राम्याः । तथा "विवादे वा" [ ३. ३. ८०. ] इति व्यक्तवाचां विवादरूपसहोक्तावस्मादेव कर्तर्यात्मनेपदं वा भवति—विप्रवदन्ते विप्रवदन्ति वा मौहूर्ताः । तथा "अनोः कर्मण्यसति" [ ३. ३. ८१. ] इति व्यक्तवाचामर्थे वर्तमानादनुपूर्वादस्मादेव कर्मण्यसति कर्तर्यात्मनेपदं भवति—अनुवदते चैत्रो मैत्रस्य । तथा "वदोऽपात्" [ ३. ३. ९७. ] इत्यपपूर्वादस्मादेव फलवत्कर्तर्यात्मनेपदं भवति—एकान्तमपवदते । रूपाणि चास्य—

व० व-दते, देते, दन्ते; दसे, देथे, ध्वे; दे, दावहे, दामहे ।

स० वदे-त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० व-दताम्, देताम्, दन्ताम्; दस्व, देथाम्, ध्वम्; दै, दावहै, दामहै ।

ह्य० अव-दत, देताम्, दन्त; दथाः, देथाम्, दध्वम्; दे, दावहि, दामहि ।

अ० अवदि-ष्ट, षाताम्, षत; ष्ठाः, षाथाम्, ड्ढ्वम्, ध्वम्; षि, ष्वहि, ष्महि ।

प० ऊ-दे, दाते, दिरे; दिषे, दाथे, दिध्वे; दे, दिवहे, दिमहे ।

आ० वदिषी-ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ध्वम्; य, वहि, महि ।

श्व० वदिता-", रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० वदि-ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे ।

क्रि० अवदि-ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ॥

"समो गमृच्छि-प्रच्छि-श्रु-वित्-स्वरत्यर्तिदृशः" [ ३. ३. ८४. ] इति सम्पूर्वात् ३९६ "गम्लृं गतौ" १३४२ "ऋछत् इन्द्रियप्रलयमूर्तिभावयोः" १३४७ "प्रच्छंत् ज्ञीप्सायाम्" १२९६ "श्रुंट् श्रवणे" १०९८ "विदक् ज्ञाने" २१ "औस्वृ शब्दोपतापयोः" २६ "ऋं प्रापणे च" ११३४ "ऋंक् गतौ" ४९५ "दृशृं प्रेक्षणे" इत्येतेभ्यः कर्मण्यसति कर्तर्यात्मनेपदं भवति। तत्र सम्+गम्धातो रूपाणि—

व० संग-च्छते, च्छेते, च्छन्ते; च्छसे, च्छेथे, च्छध्वे; च्छे, च्छावहे, च्छावहे ।

स० संगच्छे-त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० संग-च्छताम्, च्छेताम्, च्छन्ताम्; च्छस्व, च्छेथाम्, च्छध्वम्; च्छै, च्छावहै, च्छामहै ।

ह्य० समग-च्छत, च्छेताम्, च्छन्त; च्छथाः, च्छेथाम्, च्छध्वम्; च्छे, च्छावहि, च्छामहि ।

अ० समग-त, साताम्, सत; थाः, साथाम्, द्ध्वम्, ध्वम्; सि, स्वहि, स्महि ।

समगं-स्त, साताम्, सत; स्थाः, साथाम्, न्द्ध्वम्, न्ध्वम्; सि, स्वहि, स्महि ।

प० संजग्–मे, माते, मिरे; मिषे, माथे, मिध्वे; मे, मिवहे, मिमहे ।

आ० संगंसी / सगसी }–ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ध्वम्; य, वहि, महि ।

श्व० संगन्ता–", रौः, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० संगं–स्यते, स्येते, स्यन्ते; स्यसे, स्येथे, स्यध्वे; स्ये, स्यावहे, स्यामहे ।

क्रि० समगं–स्यत, स्येताम्, स्यन्त; स्यथाः, स्येथाम्, स्यध्वम्; स्ये, स्यावहि, स्यामहि ॥

**सम्+ऋच्छ्धातो रूपाणि—**

व० समृ–च्छते, च्छेते, च्छन्ते; च्छसे, च्छेथे, च्छध्वे; च्छे, च्छावहे, च्छामहे ।

स० समृच्छे–त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० समृ–च्छताम्, च्छेताम्, छन्त; च्छस्व, च्छेथाम्, च्छध्वम्; च्छै, च्छावहै, च्छामहै ।

ह्य० समा–र्च्छत, र्च्छेताम्, र्च्छन्त; र्च्छथाः, र्च्छेथाम्, र्च्छध्वम्; र्च्छे, र्च्छावहि, र्च्छामहि ।

अ० समार्च्छि–ष्ट, षाताम्, षत; ष्ठाः, षाथाम्, ड्ढ्वम्, ध्वम्; षि, ष्वहि, ष्महि ।

प० समान–र्च्छे, र्च्छाते, र्च्छिरे; र्च्छिषे, र्च्छाथे, र्च्छिध्वे; र्च्छे, र्च्छिवहे, र्च्छिमहे ।

आ० समृच्छिषी–ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ध्वम्; य, वहि, महि ।

श्व० समृच्छिता–", रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० समृच्छि–ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे ।

क्रि० समर्च्छि–ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ॥

**सम्+प्रच्छ्धातो रूपाणीहैव पुरा दर्शितानि ।**

**सम्+श्रुधातो रूपाणि—**

व० संशृ–णुते, ण्वाते, ण्वते; णुषे, ण्वाथे, णुध्वे; ण्वे, णुवहे–ण्वहे, णुमहे, ण्महे ।

स संशृण्वी – त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० संशृ – णुताम्, ण्वाताम्, ण्वताम्; णुष्व, ण्वाथाम्, णुध्वम्; णवै, णावहै, णामहै ।

ह्य० समशृ – णुत, ण्वाताम्, ण्वत; णुथाः, ण्वाथाम्, णुध्वम्; ण्वि, णुवहि, ण्वहि, णुमहि, ण्महि ।

अ० समश्रो – ष्ट, षाताम्, षत; ष्ठाः, षाथाम्, ड्ढ्वम्, ढ्वम्; षि, ष्वहि, ष्महि ।

प० संशुश्रु – वे, वाते, विरे; षे, वाथे, ढ्वे; वे, वहे, महे ।

आ० संश्रोषी – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ढ्वम्; य, वहि, महि ।

श्व० संश्रोता – ", रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० संश्रो – ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे ।

क्रि० समश्रो – ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ।

सम्+विद्धातो रूपाणि—

व० संवि – त्ते, दाते, द्रते, दते; त्से, दाथे, द्ध्वे; दे, द्वहे, द्महे ।

स० संविदी – त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० संवि – त्ताम्, दाताम्, द्रताम्, दताम्; त्स्व, दाथाम्, द्ध्वम्; दै, दावहै, दामहै ।

ह्य० समवि – त्त, दाताम्, द्रत, दत्त; त्थाः, दाथाम्, द्ध्वम्; दि, द्वहि, द्महि ।

अ० समवेदि – ष्ट, षाताम्, षत; ष्ठाः, षाथाम्, ड्ढ्वम् – ध्वम्; षि, ष्वहि, ष्महि ।

प० संविदाञ्च – क्रे, क्राते, क्रिरे; कृषे, क्राथे, कृढ्वे; क्रे, कृवहे कृमहे । संविदाम्बभूव, संविदामास, इत्यादि ।

आ० संवेदिषी – ष्ट, यास्ताम्; रन्; ष्ठाः, यास्थाम्, ध्वम्; य, वहि, महि ।

श्व० संवेदिता – ", रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० संवेदि – ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे ।

क्रि० समवेदि - ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ।

**सम्+स्वृधातो रूपाणि—**

व० संस्व - रते, रेते, रन्ते; रसे, रेथे, रध्वे; रे, रावहे, रामहे ।
स० संस्वरे - त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।
प० संस्व - रताम्, रेताम्, रन्ताम्; रस्व, रेथाम्, रध्वम्; रै, रावहै, रामहै ।

ह्य० समस्व - रत, रेताम्, रन्त; रथाः, रेथाम्, रध्वम्; रे, रावहि, रामहि,
अ० समस्वरि - ष्ट, षाताम्, षत; ष्ठाः, षाथाम्, ड्ढ्वम्, ढ्वम्, ध्वम्; षि, ष्वहि, ष्महि ।

समस्वृ - त, षाताम्, षत; थाः, षाथाम्, ड्ढ्वम्, ढ्वम्; षि, ष्वहि, ष्महि ।

प० संसस्व - रे, राते, रिरे; रिषे, राथे, रिध्वे, रिढ्वे; रे, रिवहे, रिमहे ।

आ० संस्वरिषी - ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ढ्वम्, ध्वम्; य, वहि, महि ।

संस्वृषी - ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ढ्वम्; य, वहि, महि ।

श्व० संस्वर्ता } -", रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।
संस्वरिता }

भ० संस्वरि - ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे ।
क्रि० समस्वरि - ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ॥

**सम्पूर्वस्य २६ "ऋं प्रापणे च" इत्यस्य रूपाणि—**

व० समृ - च्छते, च्छेते, च्छन्ते; च्छसे, च्छेथे, च्छध्वे; च्छे, च्छावहे, च्छामहे ।
स० समृच्छे - त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।
प० समृ - च्छताम्, च्छेताम्, च्छन्ताम्; च्छस्व, च्छेथाम्, च्छध्वम्; च्छै, च्छावहै, च्छामहै ।

ह्य० समा – र्च्छेत, र्च्छेताम्, र्च्छेन्त; र्च्छेथाः, र्च्छेथाम्, र्च्छेध्वम्; र्च्छे, र्च्छावहि, र्च्छामहि ।

अ० समा – रत, रेताम्, रन्त; रथाः, रेथाम्, रध्वम्; रे, रावहि, रामहि ।
समा – र्ष्ट, र्षाताम्, र्षत; र्ष्ठाः, र्षाथाम्, र्ड्ढ्वम्-र्ढ्वम्; र्षि, र्ष्वहि, र्ष्महि ।

प० समा – रे, राते, रिरे; रिषे, राथे, रिढ्वे-रिध्वे; रे, रिवहे, रिमहे ।

आ० समृषी – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ढ्वम्; य, वहि, महि ।

श्व० समर्ता – ", रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ॥

भ० समरि – ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे ।

क्रि० समारि – ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ॥

**सम्पूर्वस्य ११३४ "ऋंक् गतौ" इत्यस्य रूपाणि—**

व० समि – यृते, य्राते, य्रते; यृषे, य्राथे, यृध्वे; य्रे, यृवहे, यृमहे ।

स० समिय्री – त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० समि – यृताम्, य्राताम्, य्रताम्; यृष्व, य्राथाम्, यृध्वम्; यरै, यरावहै, यरामहै ।

ह्य० समै – य्रत, य्राताम्, य्रत; यृथाः, य्राथाम्; यृध्वम्; यि्र, यृवहि, यृमहि ।

अ० समा – रत, रेताम्, रन्त; रथाः, रेथाम्, रध्वम्; रे, रावहि, रामहि ।
समा – र्ष्ट, र्षाताम्, र्षत; र्ष्ठाः, र्षाथाम्, र्ड्ढ्वम्-र्ढ्वम्; र्षि, र्ष्वहि, र्ष्महि ।

प० समा – रे, राते, रिरे; रिषे, राथे, रिढ्वे-रिध्वे; रे, रिवहे, रिमहे ।

आ० समृषी – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ढ्वम्; य, वहि, महि ।

श्व० समर्ता – ", रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० समरि – ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे ।

क्रि० समारि – ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ॥

**सम्+दृश्धातो रूपाणि—**

व० संप – श्यते, श्येते, श्यन्ते; श्यसे, श्येथे, श्यध्वे; श्ये, श्यावहे, श्यामहे ।

स० संपश्ये – त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० संप – घ्यताम्, घ्येताम्, घ्यन्ताम्; घ्यस्व, घ्येथाम्, घ्यध्वम्; घ्यै, घ्यावहै, घ्यामहै ।

ह्य० समप – घ्यत, घ्येताम्, घ्यन्त; घ्यथाः, घ्येथाम्, घ्यध्वम्; घ्ये, घ्यावहि, घ्यामहि ।

अ० समद – ष्ट, क्षाताम्, क्षत; ष्ठाः, क्षाथाम्, ड्ढ्वम्, ग्ड्ढ्वम्; क्षि, क्ष्वहि, क्ष्महि ।

प० संदद – शे, शाते, शिरे; शिषे, शाथे, शिध्वे; शे, शिवहे, शिमहे ।

आ० संदक्षी – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ध्वम्; य, वहि, महि ।

श्व० संद्रष्टा – ”, रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० संद्र – क्ष्यते, क्ष्येते, क्ष्यन्ते; क्ष्यसे, क्ष्येसे, क्ष्यध्वे; क्ष्ये, क्ष्यावहे, क्ष्यामहे ।

क्रि० समद्र – क्ष्यत, क्ष्येताम्, क्ष्यन्त; क्ष्यथाः, क्ष्येथाम्, क्ष्यध्वम्; क्ष्ये, क्ष्यावहि, क्ष्यामहि ।

“**आङो यम-हनः स्वेऽङ्गे च**” [ ३, ३. ८६. ] **इत्याङ्पूर्वात् १०९९** “हनंक् हिंसागत्योः” **इत्यतः कर्मण्यसति, कर्तुः स्वेऽङ्गे च कर्मणि, कर्तर्यात्मनेपदं भवति ।**

व० आ – हते, घ्नाते, घ्नते; हसे, घ्नाथे, हध्वे; घ्ने, हन्वहे, हन्महे ।

स० आघ्नी – त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० आ – हताम्, घ्नाताम्, घ्नताम्; हस्व, घ्नाथाम्, हध्वम्; हनै, हनावहै, हनामहै ।

ह्य० आ – हत, घ्नाताम्, घ्नत; हथाः, घ्नाथाम्, हध्वम्; घ्नि, हन्वहि, हन्महि ।

अ० आवधि – ष्ट, षाताम्, षत; ष्ठाः, षाथाम्, ड्ढ्वम्-ध्वम्; षि, ष्वहि, ष्महि ।

आह – त, साताम्, सत; थाः, साथाम्, द्ध्वम्-ध्वम्; सि, स्वहि, स्महि ।

प० आज – घ्ने, घ्नाते, घ्निरे; घ्निषे, घ्नाथे, घ्निध्वे; घ्ने, घ्निवहे, घ्निमहे ।

आ० आवधिषी – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ध्वम्; य, वहि, महि ।

श्व० आहन्ता – ”, रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० आहनि – ष्यते, ष्येते, ष्यन्ते; ष्यसे, ष्येथे, ष्यध्वे; ष्ये, ष्यावहे, ष्यामहे ।

क्रि० आहनि – ष्यत, ष्येताम्, ष्यन्त; ष्यथाः, ष्येथाम्, ष्यध्वम्; ष्ये, ष्यावहि, ष्यामहि ॥

"व्युदस्तपः" [ ३. ३. ८७. ] इति विपूर्वादुत्पूर्वाच्च ३३३ "तपं संतापे" इत्यतः कर्मण्यसति, स्वेऽङ्गे च कर्मणि, कर्तर्यात्मनेपदं भवति–वितपते उत्तपते रविः, दीप्यते रविरित्यर्थः, वितपते उत्तपते पृष्ठं, तापयतीत्यर्थः, रूपाणि—

व० वित – पते, पेते, पन्ते; पसे, पेथे, पध्वे; पे, पावहे, पामहे ।

स० वितपे – त, याताम्, रन्; थाः, याथाम्, ध्वम्; य, वहि, महि ।

प० वित – पताम्, पेताम्, पन्ताम्; पस्व, पेथाम्, पध्वम्; पै, पावहै, पामहै ।

ह्य० व्यत – पत, पेताम्, पन्त; पथाः, पेथाम्, पध्वम्; पे, पावहि, पामहि ।

अ० व्यत – प्त, प्साताम्, प्सत; प्थाः, प्साथाम्, ब्द्ध्वम्-ब्ध्वम्; प्सि, प्सावहि, प्सामहि ।

प० विते – पे, पाते, पिरे; पिसे, पाथे, पिध्वे; पे, पिवहे, पिमहे ।

आ० वितप्सी – ष्ट, यास्ताम्, रन्; ष्ठाः, यास्थाम्, ध्वम्; य, वहि, महि ।

श्व० वितप्ता – ", रौ, रः; से, साथे, ध्वे; हे, स्वहे, स्महे ।

भ० वित – प्स्यते, प्स्येते, प्स्यन्ते; प्स्यसे, प्स्येथे, प्स्यध्वे; प्स्ये, प्स्यावहे, प्स्यामहे ।

क्रि० व्यत – प्स्यत, प्स्येताम्, प्स्यन्त; प्स्यथाः, प्स्येथाम्, प्स्यध्वम्; प्स्ये, प्स्यावहि, प्स्यामहि ।

"अणिकर्मणिकर्तृकाण्णिगोऽस्मृतौ" [ ३. ३. ८८. ] इति. अणिगवस्थायां यत् कर्म तदेव णिगवस्थायां कर्ता यस्य तस्माद् णिगन्तादस्मृत्यर्थाद् धातोः कर्तर्यात्मनेपदं भवति, यथा ९८८ "रुहं जन्मनि" इत्यत आङ्पूर्वाद् णिगन्तात्–आरोहयते हस्ती हस्तिपकान्, रूपाणि द्वितीयभागे दर्शितानि ।

"प्रलम्भे गृधिवञ्चेः" [ ३. ३. ८९. ] इति वञ्चनार्थात् ११८७ "गृधूच् अभिकाङ्क्षायाम्" इत्यतः १०६ "वञ्चू गतौ" इत्यतश्च णिगन्तात् कर्तर्यात्मनेपदं भवति–बटुं गर्धयते वञ्चयते वा, द्वितीयभागे रूपाणि दर्शितानि ॥

"लीङ्-लिनोऽर्चा-ऽभिभवे चाऽऽच्चाऽकर्तर्यपि" [ ३.३. ९०. ] इति १२४८ "लीङ्च् श्लेषणे" इत्यतः १५२६ "लींश् श्लेषणे" इत्यतश्च णिगन्तात् अर्चाभिभवप्रलम्भार्थे वर्तमानात् कर्तर्यात्मनेपदं भवति. आच्चानयोरकर्तर्यपि, अर्चा—जटाभिरालापयते, अभिभवः—श्येनो वर्तिकामपलापयते, प्रलम्भः—कस्त्वा-मुल्लापयते। एतद्रूपाणि द्वितीयभागे दर्शितानि॥

"स्मिङः प्रयोक्तुः स्वार्थे" [ ३. ३. ९१. ] इति प्रयोक्तृतो यः स्वार्थः स्मयस्तदर्थाद् णिगन्तात् ५८७ "ष्मिङ् ईषद्धसने" इत्यतः कर्तर्यात्मनेपदं भवति, आच्चास्याकर्तर्यपि, जटिलो विस्मापयते, एतद्रूपाणि द्वितीयभागे दर्शितानि॥

"बिभेतेर्भीष् च" [ ३. ३. ९२. ] इति प्रयोक्तृतः स्वार्थवृत्तेर्ण्यन्तात् ११३१ "ञिभींक् भये" इत्यतः कर्तर्यात्मनेपदं भवति, अस्य च भीष्, पक्षे आच्चाकर्तर्यपि, मुण्डो भीषयते, भापयते वा। एतद्रूपाणि द्वितीयभागे दर्शितानि॥

"मिथ्याकृगोऽभ्यासे" [ ३. ३. ९३. ] इति मिथ्यायुक्तात् णिगन्तात् ८८८ "डुकृंग् करणे" इत्यतः कर्तर्यात्मनेपदं भवति—पदं मिथ्या कारयते। रूपाणि द्वितीयभागे दर्शितानि॥

"परिमुहा-ऽऽयमा-ऽऽयस-पा-ट्धे-वद-वसदमा-ऽद्-रुच-नृतः फलवति" [ ३, ३. ९४. ] इति परिपूर्वात् १२३८ "मुहौच् वैचित्त्ये" इत्यतः, आङ्पूर्वात् ३८६ "यमूं उपरमे" इत्यतः, आङ्पूर्वात् १२२२ "यसूच् प्रयत्ने" इत्यतः, २ "पां पाने" इत्यतः, २८ "ट्धें पाने" इत्यतः, ९९८ "वद व्यक्तायां वाचि" इत्यतः, ९९९ "वसं निवासे" इत्यतः, १२३१ "दमूच् उपशमे" इत्यतः, १०५९ "अदं भक्षणे" इत्यतः, ९३८ "रुचि अभिप्रीत्यां च" इत्यतः, ११५२ "नृतैच् नर्तने" इत्यतश्च णिगन्तात् फलवति कर्तर्यात्मनेपदं भवति—परिमोहयते मैत्रम्, आयामयते सर्पम्, आयासयते मैत्रम्, पाययते बटुम्, धापयते शिशुम्, वादयते बटुम्, वासयते पान्थम्, दमयते अश्वम्, आदयते चैत्रेण, रोचयते मैत्रम्, नर्तयते नटम्। एतद्रूपाणि द्वितीयभागे दर्शितानि॥

"ईगितः" [ ३. ३. ९५. ] इत्यनेन ईदितो गितश्च धातोः फलति कर्तर्यात्मनेपदं भवति, ९९१ "यजीं देवपूजासङ्गतिकरणदानेषु" इत्यस्य यजते, ८८८ "डुकृंग् करणे" इत्यस्य च कुरुते। एतद्रूपाणि प्रथमभागे प्रदर्शितानि॥

॥ इत्यात्मनेपदप्रक्रिया ॥

# ॥ अथ परस्मैपदप्रक्रिया ॥

"शेषात् परस्मै" [ ३. ३. १००. ] इति येभ्यो धातुभ्यो येन विशेषेणात्मनेपदमुक्तं ततोऽन्यस्मात् कर्तरि परस्मैपदं भवति–१ "भू सत्तायाम्" भवति, एतद्रूपाणि प्रथमभागे प्रदर्शितानि ॥

"परानोः कृगः" [ ३. ३. १०१. ] इति परानुपूर्वात् ८८८ "डुकृंग् करणे" इत्यतः फलवत्कर्तर्यपि परस्मैपदं भवति–पराकरोति, अनुकरोति । एतद्रूपाणि प्रथमभागे दर्शितानि ॥

"प्रत्यभ्यतेः क्षिपः" [ ३. ३. १०२. ] इति प्रत्यादिपूर्वात् १३१७ "क्षिपींत् प्रेरणे" इत्यतः फलवत्कर्तर्यपि परस्मैपदं भवति–प्रतिक्षिपति, अभिक्षिपति, अतिक्षिपति । एतद्रूपाणि प्रथमभागे दर्शितानि ॥

"प्राद् वहः" [ ३. ३. १०३. ] इति प्रपूर्वाद् ९९५ "वहीं प्रापणे" इत्यतः फलवत्कर्तर्यपि परस्मैपदं भवति–प्रवहति । एतद्रूपाणि प्रथमभागे दर्शितानि ॥

"परेर्मृषश्च" [ ३. ३. १०४. ] इति परिपूर्वात् १२८४ "मृषीच् तितिक्षायाम्" इत्यतः, ९९६ "वहीं प्रापणे" इत्यतश्च फलवत्यपि कर्तरि परस्मैपदं भवति–परिमृष्यति, परिवहति । एतद्रूपाणि प्रथमभागे दर्शितानि ॥

"व्याङ्परे रमः" [ ३. ३. १०५. ] इति व्याङ्परिपूर्वात् ९९९ "रामिँक्रीडायाम्" इत्यतः कर्तरि परस्मैपदं भवति–विरमति, आरमति, परिरमति; एवं–"वोपात्" [ ३. ३. १०६ ] इति उपपूर्वादस्मादेव कर्तरि वा परस्मैपदं भवति–भार्यामुपरमति, उपरमते वा । परस्मैपदे रूपाणि—

व० विरम – ति, तः, न्ति; सि, थः, थ; विरमा – मि, वः, मः ।

स० विरमे – त्, ताम्, युः; :, तम्, त; यम्, व, म ।

प० विरम – तु, तात्, ताम्, न्तु; ", तात्, तम्, त; विरमा – णि, व, म ।

ह्य० व्यरम – त्, ताम्, न्; :, तम्, त; म्, व्यरमा – व, म ।

अ० व्यरं – सीत्, सिष्टाम्, सिषुः; सीः, सिष्टम्, सिष्ट; सिषम्, सिष्व, सिष्म।

प० विरराम, विरे – मतुः, मुः, विररन्थ, विरे – मिथ, मथुः, रेम, विर – राम, रम, विरे – मिव, मिम।

आ० विरम्या – त्, स्ताम्, सुः; याः, स्तम्, स्त; सम्, स्व, स्म।

श्व० विरन्ता – ", रौ, रः; सि, स्थः, स्थ; स्मि, स्वः, स्मः।

भ० विरंस्य – ति, तः, न्ति; सि, थः, थ; विरंस्या – मि, वः, मः।

क्रि० व्यरंस्य – त्, ताम्, न्; तम्, त; म्, व्यरंस्या – व, म॥

"अणिगि प्राणिकर्तृकानाप्याण्णिगः" [ ३. ३. १०७. ] इत्यणिगवस्थायां यः प्रणिकर्तृकोऽकर्मकश्च धातुस्तस्माद् णिगन्तात् फलवत्यपि कर्तरि परस्मैपदं भवति, १११८ "आसिक् उपवेशने" इत्यस्य आसयति मैत्रम्। एतद्रूपाणि द्वितीयभागे प्रदर्शितानि॥

"चल्याहारार्थेङ्-बुध-युध-प्रु-द्रु-स्नु-नश-जनः" [ ३. ३. १०८. ] इति ९७२ "चल कम्पने" इत्यादितश्चल्यर्थात् १४८७ "भुजंप् पालनाभ्यवहारयोः" इत्यादित आहारार्थात्, १००३ "इंङ्क् अध्ययने" इत्यतः, १२६२ "बुधिं ज्ञाने" इत्यतः, १२६० "युधिंच् सम्प्रहारे" इत्यतः, ५९७ "प्रुंङ् गतौ" इत्यतः, १३ "द्रुं गतौ" इत्यतः, १५ "स्नुं गतौ" इत्यतः, १२०२ "नशौच् अदर्शने" इत्यतः, १२६५ "जनैचि प्रादुर्भावे" इत्यतश्च फलवत्यपि कर्तरि परस्मैपदं भवति, यथा – चलयति, कम्पयति; भोजयति, आशयति, चैत्रमन्नम्; सूत्रमध्यापयति शिष्यम्, बोधयति पदं रविः, योधयति काष्ठानि, प्रावयति राज्यम्, द्रावयत्ययः, स्नावयति तैलम्, नाशयति पापम्, जनयति पुण्यम्। एतद्रूपाणि द्वितीयभागे दर्शितानि॥

८७० "ऊहि तर्के" इत्यस्य "उपसर्गादस्योहो वा" [ ३. ३. २६. ] इत्यात्मनेपदविकल्पनात् पक्षे परस्मैपदं भवति–समूहति। अस्य परस्मैपदे रूपाणि—

व० समूह – ति, तः, न्ति; सि, थः, थ; समूहा – मि, वः, मः।

स० समूहे – त्, ताम्, युः; :, तम्, त; यम्, व, म।

प० समूह – तु, तात्, ताम्, न्तु; ", तात्, तम्, त; समूहा – नि, व, म।

ह्य० समौह – त्, ताम्, न्; तम्, त; म्, समौहा – व, म।

अ० समौ – हीत्, हिष्टाम्, हिषुः; हीः, हिष्टम्, हिष्ट; हिषम्, हिष्व, हिष्म ।

प० समूहाञ्च – कार, ऋतुः, क्रुः; कर्थ, ऋथुः, ऋ; कार, कर, कृव, कृम ।

आ० समूह्या – त्, स्ताम्, सु,:, स्तम्, स्त; सम् स्व, स्म ।

श्व० समूहिता – ”, रौ रः; सि, स्थः, स्थ; स्मि, स्वः, स्मः ।

भ० समूहिष्य – ति, तः, न्ति; सि, थः, थ; समूहिष्या – मि, वः, मः ।

क्रि० समौहिष्यत – त्, ताम्, न्; तम्, त; म्, समौहिष्या – व, म ॥

॥ इति परस्मैपदप्रक्रिया ॥

---

श्रीमत्तपोगणगगनाङ्गणगगनमणि-सार्वसार्वज्ञशासनसार्वभौम-विद्यापीठादि-
प्रस्थानपञ्चकसमाराधक-संविग्नशाखीया-ऽऽचार्यचूडामण्यखण्डविजय-
श्रीमद्गुरुराजविजयनेमिसूरीश्वरचरणेन्दिरामन्दिरेन्दिन्दिरा-
यमाणान्तिष-द्व्याकरवाचस्पति-शास्त्रविशारद-कविरत्नविजय-
लावण्यसूरिविरचितस्य धातुरत्नाकरस्यात्मनेपदपर-
स्मैपदप्रक्रियानिरूपणात्मकोऽष्टमो विभागः संपूर्णः ॥

## ॥ उपात्तधातूनामकारादिका पत्राङ्कसहिता सूचिः ॥

तत्रात्मनेपदे—अतिदिष्टरूपा मूलधातवः—

२ एध्, १–१६–२४ कृ, ८ कृप्, ३ क्री, ९ दा, ८ द्युतादि, ७ नाथ्, ७ नी, ७ भुज्, १ भू, ८ मृ, २४ यज्, ३ युज्, २ लू, २ व्रह्, ८ वृतादि, ८ शद्, ७ शप्, २ शी, २–७ हृ, ११ ह्वे।

आत्मनेपदे एवातिदिष्टाः सन्नन्ता धातवः—

१५ शक्, १५ शी, १४ श्रु, १५ स्मृ।

आत्मनेपद एवातिदिष्टः क्यङ्ष्प्रत्ययान्तो नामधातुः ८ निद्राय। आत्मनेपद एवातिदिष्टोऽनुप्रयुक्तः १६ कृधातुः। आत्मनेपद एवातिदिष्टा णिगन्ता धातवः—

२४ अद्, २४ कृ, १० गम्, २३ गृध्, २४ दम्, २४ धे, २४ नृत्, २४ पा, २४ भी, २४ मुह्, २४ यम्, २४ यस्, २४ रुच्, २३ रुह्, २४ ली, २३ वञ्च्, २४ वद्, २४ वस्, २४ स्मि,।

आत्मनेपद एवोदाहृतरूपा मूलधातवः—

३ अस्, २०–२१ ऋ, १८ ऋच्छ, ५ कॄ, ६ क्रीड्, ८ क्रम्, ४ क्ष्णु, १७ गम्, १३ गॄ, ६ चर्, ३ जि, १४ ज्ञा, २३ तप्, २१ दृश्, ९ नु, १०–१८ प्रच्छ, ११ यम्, १७ वद्, १९ विद्, २ विश्, १२ स्था, १८ श्रु, २० स्वृ, २२ हन्।

आत्मनेपद एवोदाहृतः सन्नन्तः— १५ दृश्।

अथ परस्मैपदेऽतिदिष्टा मूलधातवः—

२५ कृ, २५ क्षिप्, २५ भू, २५ मृष्, २५ वह्।

परस्मैपदे एवातिदिष्टा णिगन्ता धातवः—

२६ आस्, २६ आहारार्थकधातुः, २६ इ, २६ चलनार्थकधातुः, २६ जन्, २६ द्रु, २६ नश्, २६ प्रु, २६ बुध्, २६ युध्, २६ स्रु। परस्मैपदे एवोदाहृतौ धातू— २६ ऊह, २५ रम्॥

# नूतन – मुद्रितग्रंथो —

| | | |
|---|---|---|
| ( १ ) | 'श्रीसिद्धहेमशब्दानुशासनम्' [ बृहद्वृत्ति - बृहन्न्यास-लघुन्यासादिसहित प्रथम विभाग ] | १५–०–० |
| ( २ ) | 'तिलकमञ्जरी' [ टिप्पणक - परागवृत्तिसहित प्रथम विभाग ] | ६–०–० |
| ( ३ ) | 'तिलकमञ्जरी' [ टिप्पणक - परागवृत्तिसहित द्वितीय विभाग ] | ६–०–० |
| ( ४ ) | 'नयोपदेशः' [ तरङ्गिणीतरणिवृत्तिसहित प्रथमविभाग ] | ६–०–० |
| ( ५ ) | 'अनेकान्तव्यवस्था' [ तत्त्वबोधिनीवृत्तिसहित प्रथम विभाग ] | ५–०–० |
| ( ६ ) | 'सिद्धहेमलघुवृत्तिः' [ त्रयोदशपरिशिष्टसहित ] | ८–०–० |
| ( ७ ) | 'शास्त्रवार्त्तासमुच्चयः' स्याद्वादवाटिकाटीकायुक्तः प्रथमविभागः | ४–०–० |
| ( ८ ) | 'धातुरत्नाकरः' [ तेरपरिशिष्टसहित प्रथम विभाग द्वितीयावृत्ति ] | १२–०–० |
| ( ९ ) | 'द्वात्रिंशद् द्वात्रिंशिका' [ किरणावलीवृत्तिसहित प्रथमा ] | १–०–० |
| ( १० ) | 'द्वात्रिंशद् द्वात्रिंशिका' [ किरणावलीसहित द्वितीया ] | १–०–० |
| ( ११ ) | 'द्वात्रिंशद् द्वात्रिंशिका' [ किरणावलीसहित तृतीया ] | १–०–० |
| ( १२ ) | 'धातुरत्नाकर' [ अष्टम विभाग ] | १–०–० |
| ( १३ ) | 'रत्नाकर - पञ्चविंशिकावृत्ति' | १–०–० |
| ( १४ ) | 'गौतमस्वाम्यष्टकवृत्ति' | १–०–० |
| ( १५ ) | 'जनधर्म अने तेनी प्राचीनता' | ०-१२-० |
| ( १६ ) | 'ए ताराज प्रतापे' | ०–६–० |
| ( १७ ) | 'ए धर्मनाज प्रतापे' | २–०–० |

## मुद्यमाण ग्रंथो—

(१) 'सिद्धहेमशब्दानुशासनम्' [ बृहन्न्यासादिसहित द्वितीय विभाग ]

(२) 'तिलकमञ्जरी' [ टिप्पणकादिसहित तृतीय विभाग ]

(३) 'नयोपदेशः' [ तरङ्गिणीप्रमुखसहित द्वितीय विभाग ]

(४) 'शास्त्रवार्त्तासमुच्चय' [ स्याद्वादवाटिकासहित द्वितीय विभाग ]

(५) 'काव्यानुशासनम्' [ टीकाद्वयसहित प्रथम विभाग ]

(६) 'द्वात्रिंशिका' [ सटीक चतुर्थी ]

(७) 'न्यायसमुच्चयः' [ टीकाद्वयसहित ]

(८) 'अनेकान्तव्यवस्था' [ तत्त्वबोधिनीसहित द्वितीय विभाग ]

(९) 'स्याद्यन्तरत्नाकरः' [ द्वितीय विभाग ]

(१०) 'स्याद्यन्तसरिता' [ लघुसंस्कृतशब्दरूपावलिः ]